श्री त्रिपुरभैरवी कवचं

श्री त्रिपुरभैरवी कवचं

श्रीपार्वत्युवाच –
देवदेव महादेव सर्वशास्त्रविशारद |
कृपां कुरु जगन्नाथ धर्मज्ञोसि महामते || 1 ||

भैरवी या पुरा प्रोक्ता विद्या त्रिपुरपूर्विका |
तस्यास्तु कवचं दिव्यं मह्यं कथय तत्त्वतः || 2 ||

तस्यास्तु वचनं श्रुत्वा जगाद जगदीश्वरः |
अद्भुतं कवचं देव्या भैरव्या दिव्यरूपि वै || 3 ||

ईश्वर उवाच –
कथयामि महाविद्याकवचं सर्वदुर्लभं |
शृणुष्व त्वं च विधिना श्रुत्वा गोप्यं तवापि तत् || 4 ||

यस्याः प्रसादात्सकलं बिभर्मि भुवनत्रयं |
यस्याः सर्वं समुत्पन्नं यस्यामद्यापि तिष्ठति || 5 ||

माता पिता जगद्धन्या जगद्ब्रह्मस्वरूपिणी |
सिद्धिदात्री च सिद्धास्स्यादसिद्धा दुष्टजंतुषु || 6 ||

सर्वभूतप्रियंकरी सर्वभूतस्वरूपिणी | [*हितंकर्त्री*]
ककारी पातु मां देवी कामिनी कामदायिनी || 7 ||

एकारी पातु मां देवी मूलाधारस्वरूपिणी |
ईकारी पातु मां देवी भूरिसर्वसुखप्रदा || 8 ||

लकारी पातु मां देवी इंद्राणीवरवल्लभा |
ह्रींकारी पातु मां देवी सर्वदा शंभुसुंदरी || 9 ||

एतैर्वर्णैर्महामाया शांभवी पातु मस्तकं |
ककारी पातु मां देवी शर्वाणी हरगेहिनी || 10 ||

मकारी पातु मां देवी सर्वपापप्रणाशिनी |
ककारी पातु मां देवी कामरूपधरा सदा || 11 ||

काकारी पातु मां देवी शंबरारिप्रिया सदा |
पकारी पातु मां देवी धराधरणिरूपधृक् || 12 ||

ह्रींकारी पातु मां देवी आकारार्धशरीरिणी |
एतैर्वर्णैर्महामाया कामराहुप्रियाऽवतु || 13 ||

मकारः पातु मां देवी सावित्री सर्वदायिनी |
ककारः पातु सर्वत्र कलांबा सर्वरूपिणी || 14 ||

लकारः पातु मां देवी लक्ष्मीः सर्वसुलक्षणा |
ॐ ह्रीं मां पातु सर्वत्र देवी त्रिभुवनेश्वरी || 15 ||

एतैर्वर्णैर्महामाया पातु शक्तिस्वरूपिणी |
वाग्भवा मस्तकं पातु वदनं कामराजिता || 16 ||

शक्तिस्वरूपिणी पातु हृदयं यंत्रसिद्धिदा |
सुंदरी सर्वदा पातु सुंदरी परिरक्षतु || 17 ||

रक्तवर्णा सदा पातु सुंदरी सर्वदायिनी |
नानालंकारसंयुक्ता सुंदरी पातु सर्वदा || 18 ||

सर्वांगसुंदरी पातु सर्वत्र शिवदायिनी |
जगदाह्लादजननी शंभुरूपा च मां सदा || 19 ||

सर्वमंत्रमयी पातु सर्वसौभाग्यदायिनी |
सर्वलक्ष्मीमयी देवी परमानंददायिनी || 20 ||

पातु मां सर्वदा देवी नानाशंखनिधिः शिवा |
पातु पद्मनिधिर्देवी सर्वदा शिवदायिनी || 21 ||

पातु मां दक्षिणामूर्ति ऋषिः सर्वत्र मस्तके |
पंक्तिश्छंदः स्वरूपा तु मुखे पातु सुरेश्वरी || 22 ||

गंधाष्टकात्मिका पातु हृदयं शंकरी सदा |
सर्वसंमोहिनी पातु पातु संक्षोभिणी सदा || 23 ||

सर्वसिद्धिप्रदा पातु सर्वाकर्षणकारिणी |
क्षोभिणी सर्वदा पातु वशिनी सर्वदावतु || 24 ||

आकर्षिणी सदा पातु सदा संमोहिनी तथा |
रतिदेवी सदा पातु भगांगा सर्वदावतु || 25 ||

माहेश्वरी सदा पातु कौमारी सर्वदावतु |
सर्वाह्लादनकारी मां पातु सर्ववशंकरी || 26 ||

क्षेमंकरी सदा पातु सर्वांगं सुंदरी तथा |
सर्वांगं युवती सर्वं सर्वसौभाग्यदायिनी || 27 ||

वाग्देवी सर्वदा पातु वाणी मां सर्वदावतु |
वशिनी सर्वदा पातु महासिद्धिप्रदावतु || 28 ||

सर्वविद्राविणी पातु गणनाथा सदावतु |
दुर्गादेवी सदा पातु वटुकः सर्वदावतु || 29 ||

क्षेत्रपालः सदा पातु पातु चाऽपरशांतिदा |
अनंतः सर्वदा पातु वराहः सर्वदावतु || 30 ||

पृथिवी सर्वदा पातु स्वर्णसिंहासनस्तथा |
रक्तामृतश्च सततं पातु मां सर्वकालतः || 31 ||

सुधार्णवः सदा पातु कल्पवृक्षः सदावतु |
श्वेतच्छत्रं सदा पातु रत्नदीपः सदावतु || 32 ||

सततं नंदनोद्यानं पातु मां सर्वसिद्धये |
दिक्पालाः सर्वदा पांतु द्वंद्वौघाः सकलास्तथा || 33 ||

वाहनानि सदा पांतु सर्वदाऽस्त्राणि पांतु मां |
शस्त्राणि सर्वदा पांतु योगिन्यः पांतु सर्वदा || 34 ||

सिद्धाः पांतु सदा देवी सर्वसिद्धिप्रदावतु |
सर्वांगसुंदरी देवी सर्वदावतु मां तथा || 35 ||

आनंदरूपिणी देवी चित्स्वरूपा चिदात्मिका |
सर्वदा सुंदरी पातु सुंदरी भवसुंदरी || 36 ||

पृथग्देवालये घोरे संकटे दुर्गमे गिरौ |
अरण्ये प्रांतरे वाऽपि पातु मां सुंदरी सदा || 37 ||

इदं कवचमित्युक्तं मंत्रोद्धारश्च पार्वति |
यः पठेत्प्रयतो भूत्वा त्रिसंध्यं नियतः शुचिः || 38 ||

तस्य सर्वार्थसिद्धिः स्याद्यद्यन्मनसि वर्तते |
गोरोचनाकुंकुमेन रक्तचंदनकेन वा || 39 ||

स्वयंभूकुसुमैश्शुक्लैः भूमिपुत्रे शनौ सुरे |
श्मशाने प्रांतरे वापि शून्यागारे शिवालये || 40 ||

स्वशक्त्या गुरुणा यंत्रं पूजयित्वा कुमारिकां |
तन्मनुं पूजयित्वा च गुरुपंक्तिं तथैव च || 41 ||

देव्यै बलिं निवेद्याथ नरमार्जारसूकरैः |
नकुलैर्महिषैर्मेषैः पूजयित्वा विधानतः || 42 ||

धृत्वा सुवर्णमध्यस्थं कंठे वा दक्षिणे भुजे |
सुतिथौ शुभनक्षत्रे सूर्यस्योदयने तथा || 43 ||

धारयित्वा च कवचं सर्वसिद्धिं लभेन्नरः |
कवचस्य च माहात्म्यं नाहं वर्षशतैरपि || 44 ||

शक्नोमि तु महेशानि वक्तुं तस्य फलं तु यत् |
न दुर्भिक्षफलं तत्र न शत्रोः पीडनं तथा || 45 ||

सर्वविघ्नप्रशमनं सर्वव्याधिविनाशनं |
सर्वरक्षाकरं जंतोश्चतुर्वर्गफलप्रदं || 46 ||

यत्र कुत्र न वक्तव्यं न दातव्यं कदाचन |
मंत्रप्राप्य विधानेन पूजयेत्सततं सुधीः || 47 ||

तत्रापि दुर्लभं मन्ये कवचं देवरूपिणं |
गुरोः प्रसादमासाद्य विद्यां प्राप्य सुगोपितां || 48 ||

तत्रापि कवचं दिव्यं दुर्लभं भुवनत्रये |
श्लोकं वा स्तवमेकं वा यः पठेत्प्रयतः शुचिः || 49 ||

तस्य सर्वार्थसिद्धिः स्याच्छंकरेण प्रभाषितं |
गुरुर्देवो हरः साक्षात्पत्नी तस्य च पार्वती || 50 ||

अभेदेन यजेद्यस्तु तस्य सिद्धिरदूरतः || 51 ||

इति श्रीरुद्रयामळे भैरवभैरवीसंवादे श्री त्रिपुरभैरवी कवचं ||